# Shri Shadanana Dandakam

# શ્રીષડાનનદણ્ડકમ્

## Document Information

Text title : Shadanana Dandakam

File name : ShaDAnanadaNDakam.itx

Category : subrahmanya, daNDaka

Location : doc_subrahmanya

Author : Ramanuja Deshikam

Proofread by : Sivakumar Thyagarajan Iyer, Preeti Bhandare

Description/comments : 5 in Stotrasamuchchaya 1, Edited by Pandit K. Parameshwara Aithal

Latest update : August 5, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીષડાનનદણ્ડકમ્

શ્રીમહાગણપતયે નમઃ ।

હરિઃ ૐ ।

શ્રીરામશ્રીકેશવશ્રીરામગુરુચરણારવિન્દાભ્યાં નમઃ ।

શ્રીકુમારગુરવે નમઃ । તારકાન્તકાય નમઃ । ૐ ।

અન્તેવસન્માનસરાજહંસં
    ષડ્દર્શનીનીરધિપૂર્ણચન્દ્રમ્ ।
પ્રતીપવિદ્વત્કરિપઞ્ચવક્ત્રં
    શ્રીકેશવં દેશિકમાનતોઽસ્મિ ॥ ૧॥

પ્રણમ્ય રામદેશિકં ગણેશમમ્બુજાર્ભકં
    મુરાન્તકં પુરાન્તકં દુરન્તતાપવારકમ્ ।
સમસ્તપૂરુષાર્થદં ષડાનનસ્ય દણ્ડકં
    કરોમિ ધીમતાં મુદે કુમારભક્તિસમ્પદે ॥ ૨॥

કુન્દેન્દુમન્દસ્મિતસુન્દરાસ્યં
    વન્દારુભૂદેવવરૈરુપાસ્યમ્ ।
વૃન્દારકારાતિજનૈરશાસ્યં
    વન્દે ભવાનીતનયં ષડાસ્યમ્ ॥ ૩॥

જય ગઙ્ગાવરસુત જય ગાઙ્ગેયભૂષિત ।
જય સઙ્ગીતચરિત જય ભૃઙ્ગિમુખાર્ચિત ॥ ૪॥

જય શિવસુત સર્વભૂમણ્ડલાલઙ્કૃતિસ્વર્ધુનીભાનુજાભારતીગોમતીનર્મદાબાહુદાપુણ્યગોદાવરીગણ્ડકી(ગૌતમી) કૃષ્ણવેણીમહાસહ્યજીમૂત જાતુઙ્ગભદ્રાદિપુણ્યાપગાવારસમ્મિશ્રિતબ્રહ્મહત્યાસુરાપાનચામીકરસ્તેયગુર્વઙ્ગનાગામિતાકારિત
સિદ્ધસંવેષ્ટિતે;
વિક્રમૌદાર્યગામ્ભીર્યસદ્ધૈર્યસૌન્દર્યકારુણ્યતારુણ્યદાક્ષિણ્યસાદ્ગુણ્યસત્પુણ્યસન્દોહવારાકરે, ભક્તવાઞ્છાકરે;
નમ્રવૃન્દારકસ્તોમમૌલિસ્ફુરત્પ્રત્નરત્નવ્રજાબદ્ધસૌવર્ણકોટીરરત્નચ્છટાદીપિકારાજિનીરાજિતોદારરેખાધ્વજામ્ભોજવજ્રાઙ્કુશાદ્યઙ્કુસં
ભક્તસન્તારકે;

ફુલ્લસન્મલ્લિકાપુષ્પસન્દોહબાણાવલીપૂરિતાનઙ્ગતૂણીરમેધાકરોદ્દામજઙ્ઘાલતે, મઞ્જુલીલાગતે;
સપ્તસપ્તિસ્ફુરદ્બિમ્બસમ્ભાવનાયોગ્યરત્યાપ્તલીલોપલાદર્શબિમ્બપ્રતિચ્છાયજાનુદ્વયે, દિવ્યકન્યાદ્વયે;
હેમપીતામ્બરછન્નરમ્ભાતરુદ્વન્દ્વશોભાપરાભૂતિદાનક્ષમાનઙ્ગસેનાસમુત્તુઙ્ગમાતઙ્ગશુણ્ડોપમોરુદ્વયે,
સર્વદોઘદ્દ્યે;
મઞ્જુશિઞ્જત્કટીસૂત્રદૂરીકૃતાનઙ્ગકાણ્ડાસનપ્રોતચામીકરજ્યાલતાડમ્બરે, દિવ્યહેમામ્બરે;
રુવમજીમૂતમધ્યસ્થિતશ્યામમેવાવલીમધ્યદેશસ્ફુરદ્દેવતાનાથબાણાસનભ્રાન્તિસમ્પાદકસ્વર્ણસાવર્ણ્યસંયુક્તમધ્યસ્થલપ્રોલ્લસ
ત્રાતલોકત્રયે ॥ ૧॥

મનસિજનવરત્નસમ્બદ્ધસૌવર્ણસોપાનકાસારસદેહસન્ધાયકપ્રોલ્લસદ્વૃત્તગમ્ભીરનાભીતટીરાજદુદ્દામશૈવાલશઙ્કાકરોદારરોમાવલ
મિત્રાત્મજે, વૈરિમિત્રાત્મજે;
તપ્તજામ્બૂનદપ્રોલ્લસત્કોટિશમ્પાલતાકારકાન્તિચ્છટાટોપદૂરીકૃતાશેષલોકસ્થિતાનન્તવૃત્રૌઘકોટ્યર્કસઙ્કાશનીરન્ધ્રનિઃસામ્યદિવ્યો
ચિત્રસચ્ચ્યષ્ટિતે;
તારકાદિદ્વિષદ્વીરવક્ત્રાવલીપઙ્કજવ્રાતતારાવલીયુક્તરાકાશશિસ્તોમસમ્ભાવનાયોગ્યમુક્તામણિપ્રોતનિષ્કાવલીદીપ્તતારાવલીચ
ચન્દ્રવચ્છીતલે;
દિવ્યસૌવર્ણપાઞ્ચાલિકાતર્કિતાનન્યસમ્પ્રાપ્યલાવણ્યમોઘીકૃતાશેષલેખાઙ્ગનાદેહસૌન્દર્યસર્વસ્વદેદીપ્યમાનામરેન્દ્રાત્મજાદિવ્યસ
પન્નસિન્દૂરપાટીરકસ્તૂરિકાપઙ્કસંલિપ્તસૌવર્ણકુમ્ભોપમસ્થૂલમુક્તાવલીભૂષિતોત્તુઙ્ગબર્હિર્મુખાધીશમાતઙ્ગકુમ્ભાભદિવ્યસ્તનાશ
તોષિતાખણ્ડલે;
નીલરત્નોર્મિકાકાન્તિસન્દોહસન્દર્શનોદ્ભૂતદૂર્વાઙ્કુરભ્રાન્તિશીઘ્રાગતાનેકવાતાયુપોતાવલીલાલનાસક્તસત્કઙ્કણશ્રેણિરત્નપ્રભારશ્
હસ્તિવક્ત્રાનુજે;
શૌર્યપદ્માલયાયુદ્ધસઞ્જાતનિર્ણિક્તતાલસ્ય શાન્ત્યર્થકસ્વાપતૂલાઢ્યતલ્પોપમાયોગ્યદેવારિમાયેયસમ્ભૂતદુર્વારબાધાર્તલોકત્રયત્રા
વૈરિવિધ્વંસકે;
સ્વર્ણકમ્બૂપમસ્પષ્ટરેખાત્રયાલઙ્કૃતપ્રત્નરત્નજ્વલચ્ચારુચામીકરોદારદીનારસૌવર્ણચામ્પેયસન્મલ્લિકાપુષ્પમાલાવલીભૂષિતોદારક
ભોગિનાથાર્ચિતે ॥ ૨॥

નવમણિકૃતશારદાદિત્યકોટિપ્રતીકાશસન્દીપ્તસત્કુણ્ડલાલઙ્કૃતિપ્રોલ્લસદ્ગણ્ડષડ્વક્ત્રલાવણ્યવિશ્રાણિતાશેષસૌન્દર્યરાકોદિતાનેકચ
કૃત્તિકામાતૃકે;
શોણબિમ્બાધરદ્યોતવિદ્યોતમાનોલ્લસદ્દાડિમીબીજરાજિપ્રતીકાશદન્તાલિકે, કુમ્ભિનીબાલકે;
બાલિકાશ્રોણિકાબદ્ધસુસ્નિગ્ધમુક્તાવલીકુન્દપુષ્પપ્રતીકાશમન્દસ્મિતોદારકાન્તિવ્રજાનેકચન્દ્રપ્રભાભાસિતાશેષદિઙ્મણ્ડલે,
ત્રાતસન્મણ્ડલે;
ફુલ્લસન્નાગચામ્પેયપુષ્પપ્રતીકાશનાસાન્વિતે, યોગિસન્માનિતે;
શારદામ્ભોજરાજિપ્રતિચ્છાયકર્ણાન્તવિસ્તારનેત્રાલિકાન્તિચ્છટાનિમ્નગાવીચિસન્દોહસઞ્ચારસંસક્તસન્તોષસન્તુષ્ટધન્યાશયે,
શક્રકન્યાશયે;

શૂર્પકારાતિબાણાસનાકારસુભ્રૂલતાલઙ્કૃતપ્રોલ્લસત્તારકાધીશખણ્ડપ્રતીકાશકાન્તાલિકપ્રસ્ફુરદ્વક્ત્રસૌરભ્યલોભભ્રમદ્ભૃઙ્ગસન્દ
ભૂષણૈર્ભૂષિતે;
નીલજીમૂતભૃઙ્ગાભસુસ્નિગ્ધમુગ્ધાયતપ્રોલ્લસત્કુન્તલસ્તોમસંદર્શનોઽદ્ભૂતનીલામ્બુદભ્રાન્તિસઞ્જાતસન્તોષનૃત્યન્મયૂરાવલીકા
સુપ્રભામણ્ડલે;
પ્રત્નરત્નસ્ફુરન્મેરુશૃઙ્ગપ્રતિચ્છાયકોટ્યર્કસઙ્કાશસૌવર્ણકોટીરકાન્તિચ્છટાદીપિતાનેકલોકવ્રજે, શૈલકન્યાત્મજે;
વિશ્વકર્મપ્રતિષ્ઠાપિતાનેકરત્નાઢ્યમેઘાવલીચુમ્બિસૌવર્ણહર્મ્યાગ્રસંવિષ્ટદેવાઙ્ગનાવારસઙ્ગીતદેવારિમાયેયમુખ્યાસુરસ્તોમસંહાર
મેદિનીલાલિતે;
પાદસેવાસમાયાતસાલોક્યસામીપ્યસારુપ્યસાયુજ્યકૈવલ્યસિદ્ધ્યાર્થિદેવર્ષિવિપ્રર્ષિરાજર્ષિસઞ્જાતસમ્મર્દસદ્રત્નસૌવર્ણસન્મન્દિર
સમ્પદામાકરે;
મઞ્જુમઞ્જીરકાઞ્ચીલતાદિવ્યરત્નોર્મિકાકઙ્કણશ્રોણિકેયૂરહારાવલીકુણ્ડલસ્તોમકોટીરભૂષોજ્જ્વલે, દિવ્યમુક્તાફલે
॥ ૩॥

નિરુપમબલક્લૃપ્તલોકત્રયીબાધમાયાતનૂજાતમુખ્યામરારાતિસન્દોહસંહારસંભૂતનિઃસીમકીર્તિશ્રિયા ભૂષિતે,
સ્તોત્રસન્તોષિતે;
પૂર્વતઃ સર્વગીર્વાણસંયુક્તરમ્ભોર્વશીમુખ્યવારાઙ્ગનાગીતજમ્ભારિસમ્ભાવિતે, મઞ્જુસમ્ભાષિતે;
દક્ષિણે ચિત્રગુપ્તાદિયુક્તેન ધન્યેન વૈવસ્વતેનાર્ચિતે, ચન્દનૈશ્ચર્ચિતે;
પશ્ચિમે પાશિના નિર્જરારાતિકણ્ઠાર્પિતસ્વીયપાશેન ભક્ત્યા સ્તુતે, વન્દિભિર્વન્દિતે;
ઉત્તરે કિન્નરૈશ્ચારણૈર્યક્ષગન્ધર્વવિદ્યાધરૈઃ સોપદૈર્યક્ષરાજેન સોપાયનેનાશ્રિતે, ભૂસુરોપાશ્રિતે;
ચન્દ્રકપ્રસ્ફુરચ્ચારુપક્ષદ્વયં ચિત્રરત્નજ્વલન્મેરુશૈલોપમં વેગસમ્પત્પરાભૂતપક્ષીશ્વરં પક્ષપાતાતિદૃરીકૃતારિવ્રજં કણ્ઠશોભાસમાધૂતનીલામ્બુદં નીલકણ્ઠં સમારુહ્ય તેજોમયં શક્તિવજ્રાસિશૂલાભયં ખેટકં ચક્રપાશાઙ્કુશં ચારુબાણાસનં તામ્રચૂડં વરં સન્દધાને કરે, કિઙ્કરશ્રીકરે;
સર્વમન્ત્રાત્મકે સર્વતન્ત્રાત્મકે સર્વસત્ત્વાત્મકે સર્વતત્ત્વાત્મકે સર્વવિદ્યાત્મકે સર્વશક્ત્યાત્મકે સર્વમાયાત્મકે સર્વદેવાત્મકે સર્વતો ભાસ્વરે સર્વલોકેશ્વરે સર્વયોગીન્દ્રહૃત્પદ્મસન્મન્દિરે વૈરિકીર્તિપ્રજામ્ભોધિસંશોષણપ્રસ્ફુરદ્વાડબપ્રૌઢસદ્વિક્રમ-પ્રાપ્તલોકત્રયવ્યાપિકીર્ત્યાશ્રયે તેજસામાશ્રયે સન્મનોનન્દને પાર્વતીનન્દને ત્વય્યદો માનસં મામકં ત્વત્પદધ્યાનતો નિર્મલં મુક્તકામાદિષડ્વૈરિવર્ગં સદા ખેલતાં ખેલતાં ખેલતામ્ ।

સ્તોત્રમેતત્ પરં ધર્મકામાર્થદં સર્વસિદ્ધિપ્રદં સર્વસમ્પત્પ્રદં સર્વવિદ્યાપ્રદં સર્વરક્ષાકરં સારસારસ્વતપ્રક્રિયાપાદકં તાવકં યેન વા પ્રાતરુત્થાય ભક્ત્યાનિશં જપ્યતે તેન યદ્યત્ સદા પ્રાર્થ્યતે તદ્ભવેત્ ત્વત્કૃપાપૂરતસ્તસ્ય ભક્તિર્ભવેત્ ત્વત્પદાબ્જદ્વયે, સમ્પદાં સિદ્ધયે;
ભાવસન્તાપસન્તપ્તનિર્વાણદં પાતકારણ્યસન્દોહદાવાનલં ભક્તિભાજાં પરં શ્રેયસામાસ્પદં સર્વદા સર્વયોગીન્દ્રસંસેવિતં ભક્તકૈવલ્યદં ભક્તિગમ્યં સદા સેવકાનન્દદં ભાવકાભીષ્ટદં તાવકં પદ્મસઙ્કાશપાદદ્વયં દેવસેનાર્ચિતં માનસે ભાસતામ્, સન્નિધાનં સતામ્;

ત્વત્પદામ્ભોજયુગ્મં વિનાભીષ્ટદં નાસ્તિ મેઽન્યા ગતિર્લોચનં દેહિ મે સન્તતિં દેહિ મે સમ્પદં દેહિ મે મઙ્ગલં દેહિ મે । ત્વદ્ગતિં દુર્ગતં ત્વત્કથાલાપિનં ત્વત્પદદ્રોહિણં ત્વત્કૃપાભાજનં ત્વત્કૃપાપૂરિતૈર્લોચનૈઃ પશ્ય માં સત્કૃપાપૂરિતૈર્લોચનૈઃ પશ્ય માં સત્કૃપાપૂરિતૈર્લોચનૈઃ પશ્ય મામ્, સર્વતો રક્ષ મામ્ ।
ચિન્તયન્તં ભવદ્દિવ્યરૂપાન્તરં ધ્યાનમાત્રેણ સંસારતાપાપહં પણ્ડિતાગ્રેસરં કુણ્ડલીશોપમં દર્શનામ્ભોધિસમ્પૂર્ણજૈવાતૃકં વાદિવિદ્વત્કરિવ્યૂહપઞ્ચાનનં છાત્રહંસાવલીમોદપદ્માકરં કાન્તિસમ્પત્સમાધૂતબાલારુણં શીલસમ્પત્તિસન્તુષ્ટવૈશ્વાનરં રામનામાઙ્કિતં સદ્ગુરું સર્વગં સર્વભૂતાત્મકં મન્મનોબોધકં સત્કૃપાસાગરં દેવસેનાપતે પહિ માં પાહિ માં પાહિ માં દેવ તુભ્યં નમો દેવ તુભ્યં નમો દેવ તુભ્યં નમઃ ॥ ૪॥

શ્રીરામદેશિકપદામ્બુજયુગ્મયોગ-
    સઞ્જાતનિર્મલગુણોત્તરમાનસેન ।
રામાનુજેન શરસમ્ભવદણ્ડકોઽયં
    ભક્ત્યા કૃતો નવશતૈ રગણૈઃ પ્રસન્નઃ ॥

કટાક્ષયતુ ગાઙ્ગેયો ગાઙ્ગેયનગધર્મભૂઃ ।
જૈવાતૃકો મહાસેનો જૈવાતૃકસમાનનઃ ॥

ઇતિ શ્રીરામાનુજદેશિકકૃતં શ્રીષડાનનદણ્ડકં સમાપ્તમ્ ।

ૐ શ્રીરામશ્રીકેશવશ્રીરામદેશિકવરેભ્યો નમઃ ।
શ્રીસુબ્રહ્મણ્યેશ્વરાય નમઃ ।

વન્દે ધરાદૈવતવર્ગશેખરં કન્દર્પલજ્જાકરકાન્તિસુન્દરમ્ ।
મન્દસ્મિતૈર્નિન્દિતપૂર્ણચન્દિરં વન્દારુમન્દારમુમાકુમારકમ્ ॥

The author Ramanujadeshikam was a disciple of Ramadeshika whos is eulogized in the last section of this work. It is interesting to note that this daNDakA on shrI ShaNmukhA, after the well-known shyamalADaNDaka, has been composed by a shrIvaiShNava author.

Proofread by Sivakumar Thyagarajan Iyer, Preeti Bhandare

*Shri Shadanana Dandakam*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*